22-05-2021

शास्त्री II

अनिवार्यपत्रम् ।

व्याकरणस्य छात्रस्य कृते साहित्यम् । रघुवंशम् - षष्ठसर्गः ।

" स तत्र मञ्चेषु मनोज्ञवेषान् सिंहासनस्थानुपचारवत्सु ।
वैमानिकानां मरुतामपश्यदाकृष्टलीलान्नरलोकपालान् ॥ "

रघुवंशमहाकाव्यस्य कालिदासप्रणीतस्य षष्ठसर्गात् इन्दुमतीस्वयंवरकथाप्रसङ्गादुद्धृतमस्ति पद्यमिदम् ।

अन्वयः → स तत्र वैमानिकानां मरुताम् आकृष्टलीलान् उपचारवत्सु मञ्चेषु सिंहासनस्थान् मनोज्ञवेषान् नरलोकपालान् अपश्यत् ।

राज्ञः भोजस्य रात्रिकालीनमतिथिसत्कारमङ्गीकृत्य प्रातःकाले सुसज्जितवेषः अजः स्वयंवरमण्डपं प्राप्य तत्रोपस्थितान् भूपतीनेवं ददर्श । कविः कथयति यत् अजकुमारो व्योम्नि विमानोपविष्टान् देवानिव स्वयंवरमण्डपे सुसज्जितेषु पर्यङ्केषु सिंहासनासीनान् मनोहरवेषान् भूपालकान् विलोकयामास ।

अस्मिन् श्लोके शृङ्गाररसस्य प्राधान्यम् । वैदर्भी रीतिः माधुर्य गुणः, उत्प्रेक्षालङ्कारः, उपजातिवृत्तञ्च

22-05-21

डॉ० निर्मलकुमार झा, स० प्राचार्यः ।
रा० उ० सं० महावि० सुरखसेना, पूर्णियाँ ।

22-04-2021

शास्त्री I

अनिवार्यप्रथमपत्रम् ।

साहित्यम् ।

व्याकरणेतर छात्रेभ्यः कृते ।

पारिभाषिकशब्दाः →

1. उपदेशः → आद्योच्चारणम् मुनित्रयस्य (पाणिनी, कात्यायनः, पतञ्जलिः) । यथा → धातुपाठः, सूत्राणि, गणपाठः, उणादि पाठः, लिङ्गानुशासनम्, आगमः, प्रत्ययः, आदेशः आद्याः ।

धातुपाठस्य उदाहरणम् पश्यतु → भ्वादयः धातवः ।

गणपाठस्योदाहरणम् → शकन्ध्वादिषु पररूपवाच्यम् ।

सूत्र पाठः (संज्ञादिसूत्रस्य) → सुप्तिङन्तं पदम् ।

आगमः → आगमः मित्रवत् भवति अन्यवर्णस्य ।

यथा → स्वच्छाया (स्व + छाया)

स्व त् छाया, 'छे च' सूत्रेण तुकागमः ।

स्व द् छाया, झलां जशोऽन्ते ।

स्व ज् छाया, स्तोः श्चुना श्चुः ।

स्व च् छाया, खरि च सूत्रेण ।

स्वच्छाया ।

आदेशः → शत्रुवत् । इति + अलम् = इत्यलम् ।

अत्र इकारस्थाने 'य्' आदेशः ।

22-04-21

डॉ० निर्मलकुमार झा, स० प्राचार्यः ।

रा० उ० सं० महावि० सुखसेना, पूर्णियाँ

22-04-2021

उपशास्त्री

अनिवार्य प्रथमपत्रम् ।

किसी भी भाषा के वाक्यों को अन्य भाषा में रूपान्तरित करना अनुवाद कहलाता है। जिस वाक्य का अनुवाद करना होता है, उसके अर्थ तथा भाव अन्य भाषा में भी सुरक्षित होने चाहिए। इस प्रकार कहा जा सकता है कि अनुवाद करना एक कला है।

हिन्दी से संस्कृत में अनुवाद करना अत्यन्त सरल है क्योंकि हिन्दी, संस्कृत से उद्भूत भाषा है। इसमें प्रायः संस्कृत के नियम ही व्यवहृत होते हैं। शब्दकोश भी संस्कृत का ही है। थोड़ा अन्तर लिए हुए इन दोनों भाषाओं में कोई विशेष अन्तर नहीं है।

हिन्दी से संस्कृत में अनुवाद करने के लिए कुछ विशेष बातों का ध्यान रखना चाहिए। हिन्दी के वाक्य को ध्यान से दो-तीन बार पढ़ें। फिर उस वाक्य में सबसे पहले क्रियापद को देखकर लकार यानि काल का निर्धारण करें और यह निर्णय करें कि वाक्य किस काल का है यानि क्रिया किस समय हुई, हो रही है, होगी या फिर इस वाक्य द्वारा 'चाहिए' अथवा विधि, आमन्त्रण, आज्ञा, आदेश आदि का भाव तो प्रकट नहीं हो रहा है। कालनिर्धारण के पश्चात् क्रियापद से ही कर्ता के पुरुष, वचन आदि का ज्ञान हो जाता है। कर्ता के अनुसार ही क्रियापद होता है, विभिन्न लकारों में।
यथा→ रामः गृहं गच्छति। इस वाक्य में (राम घर जाता है) गच्छति क्रियापद लट् लकार (वर्तमानकाल), प्रथम पुरुष, एकवचन में है। इस वाक्य का कर्ता 'राम' प्रथमपु०, एकव० का है। उसी के अनुसार क्रियापद 'गच्छति' है लट् लकार में।

शेष अगले दिन।

[signature] 22-04-21

डॉ० निर्मल कुमार झा, स० प्राचार्य
रा० उ० सं० महावि० सुरवसेना, पूर्णियाँ

22-04-21

साहित्यम् (प्रतिष्ठा) शास्त्री III

अष्टपत्रम् । मालविकाग्निमित्रम् ।

मङ्गलाचरणम् → " एकैश्वर्ये स्थितोऽपि प्रणतबहुफले यः स्वयं कृत्तिवासाः ।
कान्तासंमिश्रदेहोऽप्यविषयमनसां यः पुरस्ताद् यतीनाम् ॥
अष्टाभिर्यस्य कृत्स्नं जगदपि तनुभिर्बिभ्रतो नाभिमानः ।
सन्मार्गालोकनाय व्यपनयतु स वस्तामसीं वृत्तिमीशः ॥"

महाकविकालिदासरचितात् ग्रन्थात्

मालविकाग्निमित्रात् नाटकात् उद्धृतोऽयं श्लोकः मङ्गलरूपम् । अत्र कविः महादेवस्तुतिव्याजेन दर्शकानां मङ्गलानि भवेयुः इति कामये । स कथयति →

यो भगवान् शङ्करः स्वकीयभक्तेभ्यो मनोवाञ्छितफलानाम् अपारं भाण्डारं दधानोऽपि केवलं गजचर्म परिधाय स्वकार्यं सम्पादयति, स्वशरीरार्धं स्वकीयपत्नीं गौरीं निधायापि विश्वस्य भोगेभ्यः स्वकीयं मनो निवारयति, स्वअष्टाभिर्मूर्तिभिः संसारस्य पालनं कुर्वन्नपि स्वमनसि न धारयति अभिमानम्, एतादृशः विश्वस्य प्रभुः भगवान् शङ्करः पापमार्गानुसारिणीं युष्माकं बुद्धिं नाशयतु, येन सतां मार्गाणामवलोकनं पूर्णरूपेण भवेत् । कवि कालिदासः स्वकीये ग्रन्थे अभिज्ञानशाकुन्तले नाटकेऽपि भगवतः शङ्करस्य अष्टस्वरूपं (जलाग्निचन्द्रादयः) वर्णयति । अस्मिन् मङ्गलाचरणे विरोधाभासालङ्कारः स्रग्धरा वृत्तञ्च ।

[signature] 22-04-21

डॉ० निर्मलकुमार झा, स० प्राचार्य
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।

साहित्यम् (प्रतिष्ठा) शास्त्री III

अष्टपत्रम् । मालविकाग्निमित्रम् ।

मङ्गलाचरणम् → " एकैश्वर्ये स्थितोऽपि प्रणतबहुफले यः स्वयं कृत्तिवासाः ।
कान्तासंमिश्रदेहोऽप्यविषयमनसां यः पुरस्ताद् यतीनाम् ॥
अष्टाभिर्यस्य कृत्स्नं जगदपि तनुभिर्बिभ्रतो नाभिमानः ।
सन्मार्गालोकनाय व्यपनयतु स वस्तामसीं वृत्तिमीशः ॥"

महाकविकालिदासरचितात् ग्रन्थात्
मालविकाग्निमित्रात् नाटकात् उद्धृतोऽयं श्लोकः मङ्गलरूपम् । अत्र कविः महादेवस्तुतिव्याजेन दर्शकानां मङ्गलानि भवेयुः इति कामये । स कथयति →
यो भगवान् शङ्करः स्वकीयभक्तेभ्यो मनोवाञ्छितफलानाम् अपारं भाण्डारं ददानोऽपि केवलं गजचर्म परिधाय स्वकार्यं सम्पादयति, स्वशरीरार्धं स्वकीयपत्नीं गौरीं निधायापि विश्वस्य भोगेभ्यः स्वकीयं मनो निवारयति, स्वअष्टाभिर्मूर्तिभिः संसारस्य पालनं कुर्वन्नपि स्वमनसि न धारयति अभिमानम्, एतादृशः विश्वस्य प्रभुः भगवान् शङ्करः पापमार्गानुसारिणीं युष्माकं बुद्धिं नाशयतु, येन सतां मार्गाणामवलोकनं पूर्णरूपेण भवेत्
कवि कालिदासः स्वकीये ग्रन्थे अभिज्ञानशाकुन्तले नाटकेऽपि भगवत शङ्करस्य अष्टस्वरूपं (जलाग्निचन्द्रादयः) वर्णयति ।
अस्मिन् मङ्गलाचरणे विरोधाभासालङ्कारः स्रग्धरा वृत्तञ्च

[signature]

डॉ० निर्मलकुमार झा, स० प्राचार्य
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।